# एककम् - ६



# दैवायत्तं कुले जन्म ।

केचन दैवगत्या उन्नतकुलेषु जायन्ते। केचित् तु दुर्दैववशात् नीचकुलेषु लब्धजन्मानः भवन्ति। ते तु विद्यालाभाय जीवनाय च क्लिश्यन्ति। धिक् तानि जन्मानि।

# १३. मदायत्तं तु पौरुषम् ।



महाभारतयुद्धे भीष्माचार्यस्य द्रोणाचार्यस्य च पतनानन्तरं महारथः कर्णः कुरुपक्षस्य सेनानीरभवत्। तस्य युद्धसामर्थ्यम् अनितरसाधारणमासीत्। ततः प्रवृत्ते तुमुले युद्धे अर्जुनं विजिगीषुः सः तं रुरोध। हन्त! तदानीमेव तस्य रथचक्रं भुवि गर्ते पतितम्। निरुद्धगतिः कर्णः अर्जुनमवदत् - 'रे पार्थ! तिष्ठ, शस्त्रप्रयोगं मा कुरु, रथचक्रमिदम् उद्धर्तुम् अवकाशं मे देहि' इति। किन्तु 'अयमेवावसरः' इति श्रीकृष्णेन चोदितः अर्जुनः कर्णं प्रति अस्त्रं प्रयुक्तवान्। शस्त्रेणाहतः कर्णः भूमौ अपतत्। व्यथितचित्तः सः स्वेनानुभूतान् तिरस्कारान् अनुस्मरति स्म।

"प्राप्ताःविद्याः प्रयोगसमये निष्फलाः भवेयुः" इति आचार्यस्य परशुरामस्य शापवचनम्। अहो अशनिपातेन इव तेन मे मनः दहति। स शापोऽधुना फलितः। कथं सूतपुत्रस्य मम विद्यालाभः?

कदाचित् हस्तिनपुर्याम् आयुधपरीक्षासमये द्रोणाचार्यस्य प्रियशिष्यः अर्जुनः धनुर्विद्यायां प्रयोगपाटवं प्राकटयत्। तत्र अहमपि धनुर्विद्यावैभवं प्रदर्शयन् सर्वेषां प्रशंसापात्रम् अभवम्। तदनन्तरम् अर्जुनेन सह द्वन्द्वयुद्धाय उद्यतं मां निवारयन् कृपाचार्यः सोपहासमवदत् - 'द्वन्द्वयुद्धे केचन नियमाः सन्ति। समानैः सममेव द्वन्द्वयुद्धं करणीयम्। पाण्डुनन्दनः कुन्तीपुत्रोऽयम् अर्जुनः तव प्रतिद्वन्द्वी। हे महाबाहो! तव वंशः कः? मातापितरौ कौ? इत्यादिकं कथय' इति।



तदाहं नम्रशिराः अभवम्। मध्यमपाण्डवः भीमोऽपि 'हे सूतपुत्र ! त्वं कुन्तीपुत्रेण सह योद्धुं नार्हसि। यज्ञपुरोडाशः शुनकस्य न योग्यः' इति मामुपाहसत्।

वृकोदरस्य वचनं ब्रह्मास्त्रमपि अतिशेते। किञ्च अबलया द्रौपद्यापि अहमुपहसितः। तस्याः स्वयंवरवेलायां शस्त्रोद्धारणाय यतमानं मां प्रति उक्तं वचनं 'मा वृथा प्रयत्नं कुरु, सूतपुत्रं त्वां न कदापि वरिष्यामि' इति। तत् मम सह्यं नासीत्।

एवम् आजन्मनः मुहूर्तमिमं यावत् 'सूतपुत्र !' 'सूतपुत्र !' इति सर्वैः अपहसितः तिरस्कृतश्चाहम् इदानीं धर्मयुद्धेऽपि निष्करुणं वञ्चितः। हा! हन्त! हन्त! विधेर्विधानमुल्लङ्घितुं कः समर्थः? तथापि मे मनः एवम् उद्घोषयति।

सूतो वा सूतपुत्रो वा
यो वा को वा भवाम्यहम्।
दैवायत्तं कुले जन्म
मदायत्तं तु पौरुषम्।। इति।

ततः एवं पूर्ववृत्तं यवनिकायामिव मनोमुकुरे पश्यन् स शूरः क्षणेन वीरस्वर्गं प्राप।

**पदच्छेदः।**

| | | | |
|---|---|---|---|
| अर्जुनमवदत् | - अर्जुनम् + अवदत्। | कदापि | - कदा + अपि। |
| को वा | - कः + वा। | तथापि | - तथा + अपि। |
| तदानीमेव | - तदानीम् + एव। | तिरस्कृतश्चाहं | - तिरस्कृतः + च + अहं। |
| द्रौपद्यापि | - द्रौपद्या + अपि। | नार्हसि | - न + अर्हसि। |
| धर्मयुद्धेऽपि | - धर्मयुद्धे + अपि। | भीमोऽपि | - भीमः + अपि। |
| यो वा | - यः + वा। | रथचक्रमिदं | - रथचक्रम् + इदं। |
| शापोऽधुना | - शापः + अधुना। | सूतपुत्रो वा | - सूतपुत्रः + वा। |
| सूतो वा | - सूतः + वा। | सेनानीरभवत् | - सेनानीः + अभवत्। |

विधेर्विधानमुल्लङ्घितुं - विधेः + विधानम् + उल्लङ्घितुं।

**विग्रहाः।**

| | | | |
|---|---|---|---|
| नम्रशिराः | - नम्रं शिरः यस्य सः। | निरुद्धगतिः | - निरुद्धा गतिः यस्य सः। |
| पौरुषम् | - पुरुषस्य भावः। | मध्यमः | - मध्ये भवः। |
| विजिगीषुः | - विजेतुम् इच्छुः। | वृकोदरः | - वृकस्य इव उदरं यस्य सः। |
| व्यथितचित्तः | - व्यथितं चित्तं यस्य सः। | सेनानीः | - सेनां नयतीति। |
| सोपहासम् | - उपहासेन सह वर्तत इति। | | |

## किं करणीयम्?

❖ कथां सम्यक् पठतु। हस्तिनपुर्याम् आयुधपरीक्षासमये प्रवृत्तां घटनां स्वीकृत्य पटकथा (Screen play) निर्माणं करोतु।



**सूचनाः।**

- पश्चात्तलविवरणं।
- पात्राणां भावादिकम्।
- संभाषणरचना।
- दृश्यानां विवरणम्।

**श्रद्धेयाः अंशाः।**

- संभाषणस्यौचित्यम्।
- उचितभाषाप्रयोगः।
- आशयव्यक्तता।

❖ अस्त्रेणाहतस्य कर्णस्यावस्थां पत्रिकावार्तारूपेण परिवर्त्य लिखतु।

**श्रद्धेयाः अंशाः।**

- वार्तायाः समग्रता।
- वाक्यघटना।
- उचितं शीर्षकम्।

# १४. मदौद्धत्यम् ।



अस्त्राणां प्रयोगेषु चातुर्यं समार्जितुं
जीविकाप्रयत्नेषु विजयं चापि लब्धुम् ।
निषादबालः कश्चित् संजातकुतूहलः
सम्प्राप राजगुरुं प्रथितं द्रोणाचार्यम्।

सोत्साहं समागतं तं वीक्ष्य गुरुश्रेष्ठो
मनसा तुष्टो भूत्वा प्रददावनुग्रहम्।
उवाच गुरुनाथो - 'वत्स'! त्वं वनेचरः
कथं वा नृपपुत्रैस्सहितं पठिष्यसि।
विद्यायां सुसंस्कृत्यां वर्णे च पतितस्त्वं
नार्हसि क्षत्रैःसममध्येतुमुपवेष्टुम्।
गच्छ त्वं गृहं प्रति, जहीहि चिन्तामिमाम्
अप्राप्यं स्थानं प्राप्तुं प्रयत्नो विफलः स्यात्।
एकलव्योऽयं व्याधः द्रोणोक्तं वाक्यं श्रुत्वा
संजातो वीतस्पृहः आलयं प्रतिययौ।
उन्नतकुलजातैः सम्मिल्य विद्यालाभः
सामुदायिकनीतेर्विरुद्ध आसीत्तदा।
वार्णिकचिन्ताभित्तिं प्रभिद्य पुरो गन्तुम्
साहसं कर्तुं कोपि नाशकत् कष्टं कष्टम्।
भवनं प्रत्यागतो निषादकुमारोऽयम्
आचार्यं द्रोणं मत्वा मनसा ध्यायन् सदा।
अध्यैत सर्वां विद्यां संलेभे निपुणतां
गुरूणाम् आशिर्वादः सर्वत्र फलिष्यति।
अतीते काले सोऽयं द्रोणसम्प्रीणनाय
अङ्गुलीं छित्वा दत्वा गुरुदक्षिणां चक्रे।
उन्नतजातिचिन्ते! धिक् तव मदौद्धत्यं
सन्नतान् प्रति क्रौर्यं कर्तुं ते लज्जा नास्ति?
पावकयष्टिः कामं नीयतामधोमुखम्
उच्छिखो भवेदग्निरनलस्वभावोऽयम्।।

**पदच्छेदः ।**

| | | |
|---|---|---|
| अध्येतुमुपवेष्टुम् | - | अध्येतुम्+ उपवेष्टुम् |
| एकलव्योऽयम् | - | एकलव्यः + अयम् |
| चापि | - | च + अपि |
| द्रोणो गुरुः | - | द्रोणः + गुरुः |
| नार्हसि | - | न + अर्हसि |
| नीयतामधोमुखम् | - | नीयताम् + अधोमुखम् |
| नृपपुत्रैस्सहितम् | - | नृपपुत्रैः + सहितम् |
| पतितस्त्वम् | - | पतितः + त्वम् |
| प्रददावनुग्रहम् | - | प्रददौ + अनुग्रहम् |
| भवेदग्निरनलस्वभावोऽयम् | - | भवेत् + अग्निः + अनलस्वभावः + अयम् । |
| सामुदायिकनीतेर्विरुद्ध आसीत्तदा | - | सामुदायिकनीतेः + विरुद्धः + आसीत् + तदा |

**विग्रहाः ।**

| | | |
|---|---|---|
| उच्छिखः | - | उद्गता शिखा यस्य सः। |
| द्रोणोक्तम् | - | द्रोणेन उक्तम्। |
| विद्यालाभः | - | विद्यायाः लाभः। |
| वीतस्पृहः | - | वीता स्पृहा यस्मात् सः। |
| सोत्साहम् | - | उत्साहेन सह वर्तत इति। |
| संजातकुतूहलः | - | संजातं कुतूहलं यस्य सः। |

## किं करणीयम् ?

❖ कवितां सतालम् आलपतु।

**श्रद्धेयाः अंशाः।**

- अक्षरस्फुटता।
- आशयव्यक्तता।
- उचिततालः।

❖ कवितामिमां कथाप्रभाषणरूपेण परिवर्तयतु। कक्ष्यायाम् अवतारयतु।

**श्रद्धेयाः अंशाः।**

- उचितभाषाप्रयोगः।
- आशयव्यक्तता।
- उचितः भावः।

❖ 'विद्यानिषेधः' इति विषयमधिकृत्य चर्चां करोतु। टिप्पणीं च लिखतु।

**श्रद्धेयाः अंशाः।**

**चर्चायां**

- आशयव्यक्तता।
- स्वावसरप्रतिपालनम्।

**लेखने**

- उचितभाषाप्रयोगः।
- आशयव्यक्तता।
- वाक्यघटना।

## अनुबन्धः ।

**शब्दकोशः ।**

| | | | |
|---|---|---|---|
| अतिशेते | अतिक्रम्य वर्तते | കടന്നുനിൽക്കുന്നു | exceeds |
| अशनिपातः | विद्युत्पातः | ഇടിത്തീയ് | thunder bolt |
| आलयः | भवनम् | വീട് | house |
| आहतः | क्षतः | മുറിവേറ്റവൻ | the wounded |
| उद्धर्तुम् | ऊर्ध्वं नेतुम् | ഉയർത്താൻ | to lift |
| उद्यतम् | सन्नद्धम् | ഒരുങ്ങിയ | prepared |
| उपाहसत् | परिहासम् अकरोत् | പരിഹസിച്ചു | mocked |
| उवाच | अवदत् | പറഞ്ഞു | told |
| क्रौर्यम् | क्रूरता | ക്രൂരത | cruelty |
| गुरुः | आचार्यः | ആചാര്യൻ | preceptor |
| चातुर्यम् | सामर्थ्यम् | കഴിവ് | skill |
| चोदितः | प्रेरितः | പ്രേരിപ്പിക്കപ്പെട്ട | motivated |
| तुमुलम् | घोरम् | ഘോരം | wild |
| दैवायत्तम् | दैवाधीनम् | ഭാഗ്യാധീനം | good luck |
| निषादबालः | किरातबालः | കാട്ടാളബാലൻ | barbarian |
| पुरोडाशः | हविः | ഹോമദ്രവ്യം | offerings of Yaga |
| प्रतिद्वन्द्वी | प्रतिभटः | എതിരാളി | offender |
| प्रददौ | प्रायच्छत् | കൊടുത്തു | gave |
| प्रयोगपाटवम् | प्रयोगसामर्थ्यम् | പ്രയോഗസാമർത്ഥ്യം | practical skill |
| भुवि | भूमौ | ഭൂമിയിൽ | on the earth |
| मत्वा | विचार्य | ചിന്തിച്ചിട്ട് | having thought |
| मदायत्तम् | मदधीनम् | എനിക്കധീനം | under my control |

| | | | |
|---|---|---|---|
| महारथः | महान् योद्धा | മഹാരഥൻ | the great charioter |
| यतमानम् | प्रयत्नं कुर्वाणम् | പ്രയത്നിക്കുന്ന | attempt |
| रुरोध | निवारितवान् | തടഞ്ഞു | prevented |
| लज्जा | व्रीडा | നാണം | shame |
| वनेचरः | निषादः | കാട്ടാളൻ | hunter |
| वरिष्यामि | स्वीकरिष्यामि | സ്വീകരിക്കും | I will accept |
| विजिगीषुः | विजेतुम् इच्छुः | ജയിക്കാൻ ആഗ്രഹിക്കുന്നവൻ | desirous of success |
| विद्यालाभः | विद्यास्वीकारः | വിദ്യനേടൽ | acquiring knowledge |
| विफलः | निष्फलः | ഫലമില്ലാത്ത | fruitless |
| वृकोदरः | भीमसेनः | ഭീമസേനൻ | Bhima |
| व्यथितचित्तः | खिन्नमानसः | ദുഃഖിതൻ | depressed |
| व्याधः | निषादः | കാട്ടാളൻ | hunter |
| सम्प्राप | प्राप | എത്തിച്ചേർന്നു | reached |
| सेनानीः | सेनानायकः | സേനാനായകൻ | captain |
| सोपहासम् | सपरिहासम् | പരിഹാസത്തോടെ | mockingly |

**व्याकरणविशेषः।**

वनेचरः — वने चरति इत्यत्र 'वने' इति सप्तम्याः अलुक्। वनचरः इत्यपि साधुः।

**अमरकोशः।**

| | |
|---|---|
| अग्निः | अग्निर्वैश्वानरो वह्निः वीतिहोत्रो धनञ्जयः। |
| वत्सः | शकृत्करिस्तु वत्सःस्याद्दम्यवत्सतरौ समौ। |
| स्पृहा | इच्छाकाङ्क्षा स्पृहेहा तृड्वाञ्छा लिप्सा मनोरथः। |
| मनः | चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः। |

## किमधिगतम् ?

### पटकथायाः लेखनम्

| | स्वयं साधु कृतम् | सुहृदः साहाय्येन कृतम् | परिष्करणीयं वर्तते |
|---|---|---|---|
| पश्चात्तलसूचनाः दत्ताः | | | |
| कथापात्राणि निरूपितानि | | | |
| कथापात्राणां संभाषणं रचितम् | | | |
| तेषां भावाः निर्दिष्टाः | | | |
| दृश्यानि क्रमीकृतानि | | | |

### कर्णस्य अवस्थायाः

### वार्तारूपेण परिवर्तनम्

| | स्वयं साधु कृतम् | सुहृदः साहाय्येन कृतम् | परिष्करणीयं वर्तते |
|---|---|---|---|
| वार्तायाः समग्रता | | | |
| उचितं शीर्षकम् | | | |
| उचिता शैली | | | |

### 'मदौद्धत्यम्' - गानालापः

| | स्वयं साधु कृतम् | सुहृदः साहाय्येन कृतम् | परिष्करणीयं वर्तते |
|---|---|---|---|
| उचिततालः स्वीकृतः | | | |
| आशयव्यक्ततया अवतारणम् | | | |
| उच्चारणस्फुटता | | | |

### 'विद्यानिषेधः' - चर्चा

| | स्वयं साधु कृतम् | सुहृदः साहाय्येन कृतम् | परिष्करणीयं वर्तते |
|---|---|---|---|
| आशयानां सञ्चयनम् | | | |
| पाठ्यांशाद् उदाहरणानां स्वीकरणम् | | | |
| आशयव्यक्ततया अवतारणम् | | | |
| आशयानां क्रोडीकरणम् | | | |